# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
## सत्रान्तपरीक्षा-अक्टूबर-२०१९

कक्षा – शास्त्रीप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ५ | गुणा: - ७०

विषय: - स्वामिनारायणवेदान्तः (S) | कोड – CC111 (NEW) | समय: - ११-३० त: ०२-३०

दिनाङ्क: - १४-१०-२०१९ सन्दर्भग्रन्थः – सटीकघनश्यामगीता

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या।** १०

१. अवगम्य स्वरूपं मे प्रपद्य साङ्गया सदा।
धर्मज्ञानवैराग्ययुक्तभक्त्या भजस्व माम् ।।

२. प्राकट्यं मे तदर्थं हि तस्मान्मच्छरणं सदा।
मत्स्वरूपस्य साधूनां सर्वेषां हितकारकम् ।।

३. लौकिकबुद्धिहीनोऽपि यः सदाचारवान्नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ।।

**प्रश्नः – २ एकं निबन्धात्मकोत्तरं लिखत।** १०

१. प्रथमाध्यायसार:।

२. सतां लक्षणानि।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या।** १०

१. उल्लङ्घयन्ति ये मन्दा हरेराज्ञां विमुक्तिदाम्।
अत्युन्मत्ता जना भ्रातः ! विज्ञेयास्ते नराधमाः ।।

२. विशिष्यते नरो ज्ञानात् प्राणिषु तत्त्ववेदकः।
विना ज्ञानमचक्षुष्काज्जनः पश्यन्न भिद्यते ।।

३. जीवात्मा गदितो मातः ! व्याप्य सर्वं वपुःस्थितः ।
बाह्यान्तःकरणानाञ्च तद्देवानां प्रकाशकः ।।

**प्रश्नः – ४ एकं निबन्धात्मकोत्तरं लिखत ।** १०

०१. परविद्यानिरूपणम् ।
०२. चतुर्दशविद्यानिरूपणम् ।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ कयोश्चिद् द्वयोः श्लोकयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** १०

१. समूलां हन्ति वैराग्यमासक्तिमजरां दृढाम् ।
नाशो नास्त्यन्यथा तस्याः साधनैः कोटिभिः प्रसु ! ।।
२. खादन्ति पललं मद्यं पिबन्ति परयोषितः ।
गच्छन्ति निस्त्रपा मता रताश्चौर्यादिकर्मसु ।।
३. अम्ब ! नवविधा भक्तिर्निष्कामा कामनायुता ।
द्विधाऽनुष्ठीयते लोके परैहिकफला स्मृता ।।

**प्रश्नः – ६ एकं निबन्धात्मकोत्तरं लिखत ।** १०

१. सकामभक्तेर्निषेधः ।
०२. नवविधभक्तिनिरूपणम् ।

## चतुर्थान्वितिः (युनिट-4)

**प्रश्नः – ७ केषाञ्चन दशानामतिलघूत्तराणि देयानि ।** १०

१. समाजस्य धारकः कः ?
२. नारीणां भूषणं कः ?

३. माया कस्याः शक्तिः ?
४. कति योनयः सन्ति ?
५. ‘सम्भवामि युगे युगे’ इति कस्मिन् शास्त्रे आयाति ?
६. आश्रमाः कति ?
७. दानशीलता केषां सहजकर्म ?
८. पृथिव्या भूषणं कः ?
९. धनसञ्चयः केषां सहकर्माणि ?
१०. सर्वस्य भूषणं किम् ?
११. ‘अत्रैतत्समर्पितम्’ इति मन्त्रांशे कस्य तत्त्वस्य वार्ता वर्तते ?
१२. अक्षरधामेश कः ?
१३. द्विर्बद्धं किं भवति ?
१४. वयं कया जर्जरिता भवेमः ?
१५. व्यासस्य अपत्यं पुमान् ?

*****